स्वकीयजन्मलग्नमकरसंज्ञकानि ॥*॥ अथ धान्यस्थापनदिनम्। तत्र नक्षत्राणि। भरण्यश्लेषार्द्राकृत्तिकाविशाखापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपज्ज्येष्ठामघाभिन्नानि। तत्र वाराः शुभग्रहाणाम्। लग्नानि मकरवृषसिंहवृश्चिककुम्भमिथुनकन्याधनुर्मीनसंज्ञकानि ॥*॥ अथ धान्यादिवृद्धिदानदिनम्। तत्र नक्षत्राणि श्रवणा धनिष्ठा शतभिषा विशाखा उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् रोहिणी रेवती पुनर्व्वसुः पुष्यः अश्विनी ज्येष्ठा एतानि। वाराः बुधभिन्नाः। इति ज्योतिषम् ॥

धान्यकं, क्ली, ( धान्यमिव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्। ) धान्याकम्। इति राजनिर्घण्टः ॥ ( यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये। "लङ्घनानन्तरं चान्नकाले धान्यकजीरकादिदीपनसिद्धान्यन्नानि ॥" अस्य गुणा यथा,—

"धान्यकाजगन्धा च सुमुखाश्चेति रोचनाः।
सुगन्धा नातिकटुका दोषानुत्क्लेशयन्ति तु ॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥ धान्यमेव स्वार्थे कन्। धान्यम्। पुं, क्षत्रियनृपतिविशेषः। यथा, राजतरङ्गिण्याम्। ८।१०८५। "राजन्याविच्छिटक्कुलोद्भूताबुदयधान्यकौ ॥" )

धान्यकोष्ठकं, क्ली, ( धान्याय धान्यरक्षणाय यत् कोष्ठकं गृहम्। ) धान्यरक्षार्थगृहम्। इति हलायुधः ॥ गोला इति भाषा ॥

धान्यचमसः, पुं, ( चम्यते भक्ष्यते इति। चम+असन्। धान्यं खिन्नधान्यमेव चमसः। ) चिपिटकः। इति त्रिकाण्डशेषः ॥

धान्यधेनुः, स्त्री, ( धान्यनिर्म्मिता धेनुः।) दानार्थधान्यनिर्म्मितधेनुः। यथा,—

"विषुवे चायने वापि कार्त्तिक्यान्तु विशेषतः।
तदिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम् ॥
यां दत्त्वा सर्व्वपापेभ्यः शशाङ्क इव राहुतः ॥
दशधेनुप्रदानेन यत् फलं राजसत्तम !।
तत् सर्व्वमेवमाप्नोति व्रीहिधेनुप्रदो नरः ॥
कृष्णाजिनं ततः कृत्वा प्राग्वदत् संन्यसेद्बुधः।
गोमयेनानुलिप्तायां शोभनां वस्त्रसंयुताम् ॥
पूजयेद्वेदिमध्ये तु वेदनिर्घोषमङ्गलैः ॥
उत्तमा धान्यधेनुः स्याद्द्रोणानाञ्चापि चतुष्टयैः।
मध्यमा च तदर्द्धेन वित्तशाठ्यं न कारयेत् ॥
चतुर्थांशेन धेन्वा वै वत्सन्तु परिकल्पयेत्।
कर्त्तव्ये रुक्मशृङ्गे तु राजतक्षुरसंयुता ॥
गोरुधः पूर्व्ववद्घ्राणमगुरुचन्दनन्तथा।
मुक्ताफलमया दन्ता घृतक्षौद्रमयं मुखम् ॥
प्रशस्तपत्रश्रवणा कांस्यदोहनकान्विता।
इक्षुयष्टिमयाः पादाः क्षौमपुच्छसमन्विता ॥
नानाफलसमोपेता रत्नगर्भसमन्विता।
पादुकोपानहौ छत्रं भाजनं तर्पणं तथा ॥
इत्येवं रचयित्वा तां कृत्वा दीपार्च्चनादिकम्।
पुण्यकालञ्च संप्राप्य स्नातः शुक्लाम्बरो गृही।
त्रिः प्रदक्षिणमावृत्य मन्त्रेणानेन कीर्त्तयेत् ॥
तव विप्र ! महाभाग ! वेदवेदाङ्गपारग !।
यामेताञ्च मया दत्तां गृहाण त्वं द्विजोत्तम !।
प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥
त्वमेका लक्ष्मीर्गोविन्दे स्वाहा या च विभावसौ।
शक्रे शचीति विख्याता मेधा मुनिषु सत्तम ! ॥
तस्मात् सर्व्वमयी देवी धान्यरूपेण संस्थिता।
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
दत्त्वा प्रदक्षिणं कृत्वा तं समाप्य द्विजोत्तमम्।
यावच्च पृथिवी सर्व्वा वसुरत्नानि भूपते !।
तावत् पुण्यं समाधिकं व्रीहिधेनोश्च तत् फलम् ॥
तस्मान्नरेन्द्र ! दातव्या भुक्तिमुक्तिफलप्रदा।
इह लोके च सौभाग्यमायुरारोग्यवर्द्धनम् ॥
विमानेनार्कवर्णेन किङ्किणीरत्नमालिना।
स्तूयमानोऽप्सरोभिश्च प्रयाति शिवमन्दिरम् ॥
यावच्च स्मरते जन्म तावत् स्वर्गे महीयते।
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
एवं हरेण चोद्गीर्णं श्रुत्वा वाक्यं नरोत्तम।
सर्व्वपापविशुद्धात्मा रुद्रलोके महीयते ॥"

इति वराहपुराणम् ॥

धान्यबीजं, क्ली, (धान्यस्य बीजमिव बीजं यस्य।) धन्याकम्। इति राजनिर्घण्टः ॥

धान्यमायः, पुं, ( धान्यं मातीति। मा+"क्वावामश्च।" ३। २। २। इति अण्। ) धान्यविक्रयी। इति संक्षिप्तसारव्याकरणम् ॥

धान्यराजः, पुं, ( धान्यानां राजा। टच् समासे। यद्वा, धान्येषु राजते इति। राज दीप्तौ+अच्।) यवः। इति राजनिर्घण्टः ॥ (गुणादयोऽस्य यवशब्दे ज्ञातव्याः ॥ )

धान्यवर्द्धनं, क्ली, ( धान्यस्य वर्द्धनं वृद्धिर्यस्मात्। ) वार्द्धुष्यम्। इति त्रिकाण्डशेषः ॥ धानेर वाड़ी इति भाषा ॥

धान्यवीरः, पुं, ( धान्येषु वीर इव बलाधायकत्वात्। ) माषः। इति राजनिर्घण्टः ॥

धान्यशीर्षकं, क्ली, ( धान्यस्य शीर्षकं अग्रभागः। ) धान्यमञ्जरी। इति जटाधरः ॥ धानेर शीष इति भाषा ॥

धान्याकं, क्ली, ( धान्यमकति साहश्यत्वेन प्राप्नोतीति। अक गतौ+अण्। ) धन्याकम्। इति हेमचन्द्रः। ३। ८३ ॥

धान्याचलः, पुं, ( धान्यनिर्म्मितोऽचलः पर्व्वतः। ) दानार्थधान्यनिर्म्मितपर्व्वतः। तस्य विधानं यथा,—

"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः।
गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः।
सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वद्दशमः शर्कराचलः।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥
धान्यशैलादयो येऽपि देयाः शास्त्रं विजानता।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम्।
प्रागुदक्प्रवनं तद्वत् प्राङ्मुखञ्च विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान्।
तन्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥

मेरुर्महाव्रीहिमयस्तु मध्ये
सुवर्णवृक्षत्रयसंयुतः स्यात्।
पूर्व्वेण मुक्ताफलवज्रयुक्तो
याम्ये च गोमेदकपुष्परागैः ॥
पश्चाच्च गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः।
श्रीखण्डखण्डैरभितः प्रवाललतान्वितः शुक्तिशिलातलः स्यात् ॥
ब्रह्माथ विष्णुर्भगवान् पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात्।
मूर्द्धन्यवस्थागतमत्सरेण
कार्य्यास्त्वनेके च पुनर्द्विजौघाः ॥
चत्वारि शृङ्गाणि च राजतानि
नितम्बभागेष्वपि राजतः स्यात्।
तथेक्षुवंशावृतकन्दरस्तु
घृतोदकप्रस्रवणाश्च दिक्षु ॥
शुक्लाम्बराण्यम्बुधरावली स्यात्
पूर्व्वेण नीलानि च दक्षिणेन।
वासांसि पश्चादथ कर्व्वुराणि
रक्तानि चैवोत्तरतो घनाली ॥
रौप्यान्महेन्द्रप्रमुखानथाष्टौ
संस्थाप्य लोकाधिपतीन् क्रमेण।
नानाफलाली च समन्ततः स्या
न्मनोरमं माल्यविलेपनञ्च ॥
वितानकञ्चोपरि पञ्चवर्णमम्लानपुष्पाभरणं सितञ्च।
इत्थं निवेश्यामरशैलमग्र्यं
मेरोस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेन चतुर्द्दिशञ्च
संस्थापयेत् पुष्पविलेपनाढ्यान् ॥
पूर्व्वेण मन्दरमनेकफलावलीभिर्युक्तं यवैः कनकभद्रकदम्बचिह्नैः।
कामेन काञ्चनमयेन विराजमानमाकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरारुणोदसरसाथ वनेन चैव
रौप्येण शक्तिघटितेन विराजमानम्।
याम्येन गन्धमदनश्च निवेशनीयो
गोधूमसञ्चयमयः कलधौतजम्बो वा ॥
हैमेन यक्षपतिनाहृतमासनेन
वस्त्रेण राजतवनेन च संयुतः स्यात् ॥
पश्चात्तिलाचलमनेकसुगन्धिपुष्पं
सौवर्णपिप्पलहिरण्मयहंसयुक्तम्।
आकारयेद्रजतपुष्पवनेन तद्वद्दध्नान्वितं दधिसितोदसरस्तथाग्रे ॥